1647

व्याकरण

संख्या ५६

# भट्टोजी — उकारार्थप्रक्रिया

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(1)

ल॰ टि ॥३४॥ ॥ ॥ श्रीमद्दिव्यलक्ष्मीनृसिंहाय नमः ॥ ॥ लट् ॥ लिट् ॥ लुट् ॥ लृट् ॥ लेट् ॥ लोट् ॥ लङ् ॥ लिङ् ॥ लु
ङ् ॥ लृङ् ॥ एषु पञ्चमो लकारश्छन्दोमात्रगोचरः ॥ ॥ लः कर्मणि च भावे चाकर्मकेभ्यः ॥ ॥
लकाराः सकर्मकेभ्यः कर्मणि कर्त्तरि च स्युरकर्मकेभ्यो भावे कर्त्तरि च ॥ ॥ वर्त्तमाने ल
ट् ॥ ॥ वर्त्तमानक्रियावृत्तेर्धातोर्लट् स्यात् ॥ अटावितौ ॥ उच्चारणसामर्थ्याल्लस्येत् ॥
॥ ॥ भू सत्तायां ॥ ॥ कर्तृविवक्षायां भू ल इति स्थिते ॥ लस्य सधि कृस ॥ ॥ तिप्तस्झि
सिप्थस्थमिब्वस्मस्ताताञ्झथासाथांध्वमिड्वहिमहिङ् ॥ ॥ एतेऽष्टादश लादेशाः स्युः ॥
॥ ॥ लः परस्मैपदं ॥ ॥ लादेशाः परस्मैपदसंज्ञाः स्युः ॥ ॥ तङानावात्मनेपदं ॥ ॥ तङ्प्र रामः
त्याहारः शानच्कानचौ चैतत्संज्ञाः स्युः ॥ पूर्वसंज्ञाऽपवादः ॥ ॥ अनुदात्तङित आत्मनेपदं ॥ ॥ ॥१॥

(1A)

अनुदात्तेतउपदेशे योङित्तदंताद्धातोर्लस्य स्थाने आत्मनेपदं स्यात ॥ ॥स्वरितञितः कर्त्रभि
प्राये क्रियाफले ॥ ॥स्वरितेतो ञितश्च धातोरात्मनेपदं स्यात्कर्तृगामिनि क्रियाफले ॥ ॥शे
षात्कर्तरि परस्मैपदं ॥ ॥आत्मनेपदनिमित्तहीनाद्धातोः कर्त्तरि परस्मैपदं स्यात् ॥ ॥तिङ
स्त्रीणि त्रीणि प्रथममध्यमोत्तमाः ॥ ॥तिङ उभयोः पदयोस्त्रयस्त्रिकाः क्रमादेतत्संज्ञाः स्युः ॥
॥ ॥तान्येकवचनद्विवचनबहुवचनान्येकशः ॥ ॥लब्धप्रथमादिसंज्ञानि तिङस्त्रीणि त्रीणि
प्रत्येकमेकवचनादिसंज्ञानि स्युः ॥ ॥युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्य
मः ॥ ॥तिङ्वाच्यकारकवाचिनि युष्मदि प्रयुज्यमानेऽप्रयुज्यमाने च मध्यमः ॥ ॥अस्मद्यु
त्तमः ॥ ॥तथाभूते [illegible] स्मद्युत्तमः ॥ ॥शेषे प्रथमः ॥ ॥भूति इति जाते ॥ ॥तिङ्शित्सार्व
धातुकं ॥ ॥तिङः शितश्च धात्वधिकारोक्ता एतत्संज्ञाः स्युः ॥ ॥कर्त्तरि शप् ॥ कर्त्रर्थे सार्वधा

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan

(2)

भ·ति· ॥३५॥ तुके परे धातोः शप् स्यात् ॥ ॥सार्वधातुकार्धधातुकयोः ॥ ॥अनयोः परयोरिगंतांगस्य गु
णः ।अवादेशः ।भवति ।भवतः ॥ ॥झोंतः ॥ ॥प्रत्ययावयवस्य झस्यांतादेशः स्यात् ।अतो
गुणे ।भवंति ।भवसि ।भवथः ।भवथ ॥ ॥अतोदीर्घो यञि ॥ ॥अतोंगस्य दीर्घो यञादौ सा
र्वधातुके ।भवामि ।भवावः ।भवामः ।स भवति ।तौ भवतः ।ते भवंति ।त्वं भवसि ।युवां भवथः ।
यूयं भवथ ।अहं भवामि ।आवां भवावः ।वयं भवामः ॥ ॥शेषे विभाषाकखादावषांत उ
पदेशे ॥ ॥उपदेशे कादि खादि षांतवर्जे गदनदादेरन्यस्मिन्धातौ उपसर्गस्थान्निमित्ता
त्परस्य नेर्णत्वं स्याद्वा ।प्रणिभवति ।प्रनिभवति ॥ ॥परोक्षे लिट् ॥ ॥भूतानद्यतनपरो
क्षार्थवृत्तेर्धातोर्लिट् स्यात् ।लस्य तिबादयः ॥ ॥परस्मैपदानां णलतुसुस्थलथुसणल रामः
ल्वमाः ॥ ॥लिट स्तिबादीनां णलादयः स्युः ।भू अ इति स्थिते ॥ ॥भुवो वुग्लुङ्लिटोः ॥ ॥१॥

(२अ)

अचि॥ ॥लिटि धातोरनभ्यासस्य॥ ॥लिटि परेऽनभ्यासधात्ववयवस्यैकाचः प्रथमस्य द्वे स्त
आदिभूतादचः परस्य तु द्वितीयस्य। भूव् भूव् इति स्थिते॥ ॥पूर्वोऽभ्यासः॥ ॥अत्र ये द्वे तयोः
॥ ॥हलादिः शेषः॥ ॥अभ्यासस्यादिर्हल् शिष्यते अन्ये हलो लुप्यन्ते॥ ॥ह्रस्वः॥ ॥अभ्यास
स्याचः॥ ॥भवतेरः॥ ॥भवतेरभ्यासोकारस्य अः स्याल्लिटि॥ ॥अभ्यासे चर्च॥ ॥अभ्यासे
झलां चरः स्युर्जशश्च। झलां जशः खयां चर इति विवेकः। बभूव। बभूवतुः। बभूवुः॥ ॥लिट्॥
लिडादेश तिङ् आर्द्धधातुकसंज्ञः॥ ॥आर्द्धधातुकस्येड्वलादेः॥ ॥बभूविथ। बभूवथुः। ब
बभूव ३ भूव। बभूव। बभूविव। बभूविम॥ ॥अनद्यतने लुट्॥ ॥भविष्यत्यनद्यतनेऽर्थे धातोर्लुट्॥ ॥स्य
तासी लृलुटोः॥ ॥धातोरेतौ स्तो लृलुटोः परतः। शबाद्यपवादः। लृ इति लृङ् लृटो ग्रह
णं॥ ॥आर्द्धधातुकं शेषः॥ ॥तिङ्शिद्भ्योऽन्यो धात्वधिकारविहितः प्रत्यय एतत्संज्ञः स्यात्। इट्।

(3)

भ॰ति॰ ॥३६॥ ॥ ॥लुटः प्रथमस्य डारौरसः॥ ॥ इति सामर्थ्यादभस्यापि टेर्लोपः। भविता॥ ॥ तासस्त्योर्लो
पः॥ ॥ सादौ प्रत्यये॥ ॥ रिच॥ ॥ रादौ प्रत्यये तथा। भवितारौ। भवितारः। भवितासि। भवित
स्थः। भवितास्थ। भवितास्मि। भवितास्वः। भवितास्मः॥ ॥ लृट् शेषे च॥ ॥ भविष्यदर्था
द्धातोर्लृट् क्रियायां क्रियार्थायां क्रियायामसत्यां सत्यां वा॥ स्यः॥ इट्। भविष्यति। भविष्यतः। भविष्यंति
भविष्यसि। भविष्यथः। भविष्यथ। भविष्यामि। भविष्यावः। भविष्यामः॥ ॥ लोट् च॥ ॥
विध्यादिष्वर्थेषु धातोर्लोट्॥ ॥ आशिषि लिङ्लोटौ॥ ॥ एरुः॥ ॥ लोट इकारस्य उः स्यात्।
भवतु॥ ॥ तुह्योस्तातङ् आशिष्यन्यतरस्याम्॥ ॥ आशिषि तुह्योस्तातङ् वा। परत्वात्सर्वादे
शः॥ ननु ङित्वे सस्य कोऽवकाश इति चेत्॥ न। अनन्यार्थङकारयुक्तोऽनङादिष्विति रामः ॥३॥
गृहाण॥ ॥ लोटो लङ्वत्॥ ॥ लोटस्तामादयः सलोपश्च॥ ॥ तस्थस्थमिपां तांतंतामः॥

(3A)

आतश्चोप सर्गेऽइति अ ङ्

ङितश्च तुरं तामादयः स्युः । भवतां भवन्तु ॥ ॥ सेर्ह्यपिच्च ॥ ॥ लोटः सेर्हिः सोऽपिच्च ॥ ॥ अ
तो हेः ॥ ॥ लुक् । भव । भवतात् । भवतं । भवत ॥ ॥ मेर्निः ॥ ॥ लोटः ॥ ॥ आडुत्तमस्य पिच्च ॥
लोडुत्तमस्याट् स्यात् पिच्च । हिन्योरुत्वं न । इकारोच्चारणसामर्थ्यात् । भवानि ॥ ॥ ते प्राग्धा
तोः ॥ ॥ ते गत्युपसर्गसंज्ञका धातोः प्रागेव प्रयोक्तव्याः ॥ ॥ आनि लोट् ॥ ॥ उपसर्गस्थान्निमि
त्तात् परस्य लोडादेशस्यानी इत्यस्य नस्य णः स्यात् । प्रभवाणि ॥ दुरः षत्वणत्वयोरुपसर्गत्वप्र
तिषेधो वक्तव्यः ॥ दुःस्थितिः । दुर्भवानि ॥ अन्तःशब्दस्याङ्किविधिणत्वेषूपसर्गत्वं वाच्यं ॥ ॥
अन्तर्द्धा । अन्तर्भवाणि ॥ ॥ नित्यं ङितः ॥ ॥ सकारान्तस्य ङिदुत्तमस्य नित्यं लोपः । अलो
न्त्यस्येति सलोपः । भवाव । भवाम ॥ ॥ अनद्यतने लङ् ॥ ॥ अनद्यतनभूतार्थवृत्तेर्धातोर्लङ् ।
॥ ॥ लुङ्लङ्लृङ्क्ष्वडुदात्तः ॥ ॥ एष्वङ्गस्याट् ॥ ॥ इतश्च ॥ ॥ ङितो लस्य परस्मैपदमिको

उपसर्गेघ्वोः किः

(५)

म·ति· ॥३७॥ संयंयत्तस्य लोपः। अभवत्। अभवतां। अभवन्। अभवः। अभवतं। अभवत। अभुवं। अभवाव। अ
भवाम॥ ॥विधिनिमंत्रणामंत्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ्॥ ॥एष्वर्थेषु धातोर्लिङ्।
॥ ॥यासुट् परस्मैपदेषूदात्तो ङिच्च॥ ॥लिङः परस्मैपदानां यासुडागमो ङिच्च। ङित्वोक्तेर्ज्ञा
यते ङकिदनुबंधकार्ये ऽप्यन ल्विधाविति प्रतिषेध इति तेन वक्ष्यमाणेत्यस्य ङीन्न॥ ॥लिङः
सलोपोऽनंत्यस्य॥ ॥सार्वधातुकलिङोऽनंत्यस्य सस्य लोपः इति प्राप्ते॥ ॥अतो येयः॥ ॥अतः
परस्य सार्वधातुकावयवस्य यास् इत्यस्य इय्॥ ॥लोपो व्योर्वलि॥ भवेत्। भवेतां॥ ॥झे
र्जुस्॥ ॥लिङः। भवेयुः। भवेः। भवेतं। भवेत। भवेयं। भवेव। भवेम॥ ॥लिङाशिषि॥ ॥आशि
षि लिङः तिङ्शित्सार्वधातुकं सङ्ज्ञः॥ ॥किदाशिषि॥ ॥आशिषि लिङो यासुट् कित् स्यात्। स्कोरिति स राम:
लोपः॥ ॥क्ङिति च॥ ॥गित्किति ङिति निमित्ते इग्लक्षणे गुणवृद्धी न स्तः। भूयात्। भूयास्तां॥ ॥४॥

Joint property of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

भूयासुः। भूयाः। भूयास्तं। भूयास्त। भूयासं। भूयास्व। भूयास्म॥ ॥ लुङ् ॥ ॥ भूतार्थे धातोर्लुङ्॥ ॥
॥ ॥ माङि लुङ्॥ ॥ सर्वलकारापवादः॥ ॥ स्मोत्तरे लङ् च॥ ॥ स्मोत्तरे माङि लङ् स्याल्लुङ् च॥ ॥
॥ ॥ च्लि लुङि॥ ॥ शबाद्यपवादः॥ ॥ च्लेः सिच्॥ ॥ गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु॥ ॥ लुक्॥
गापा। विह एणादेशपिबती गृह्यते॥ ॥ भूसुवोस्तिङि॥ ॥ भूसुवोरेतयोः सार्वधातुके तिङि गुणो न।
अभूत्। अभूतां। अभूवन्। अभूः। अभूतं। अभूत। अभूवं। अभूव। अभूम॥ ॥ न माङ्योगे॥ ॥
अडाटौ न स्तः। मा भवान् भूत्। मा स्म भवत्। मा स्म भूत्॥ ॥ लिङ् निमित्ते लृङ् क्रियातिपत्तौ॥ ॥
हेतुहेतुमद्भावादि लिङ् निमित्तं तत्र भविष्यत्यर्थे लृङ् क्रियाया अनिष्पत्तौ गम्यमानायां। अभविष्य
त्। अभविष्यतां। अभविष्यन्। अभविष्यः। अभविष्यतं। अभविष्यत। अभविष्यं। अभविष्याव॥
अभविष्याम॥ सुवृष्टिश्चेदभविष्यत्तदा सुभिक्षमभविष्यदित्यादि ज्ञेयं॥ अभवती स्यादि उपस

(5)

गौवाम समस्तोसेपि संहितात्मिका ॥ तदुक्तं ॥ संहितैकपदे नित्या नित्या धातूपसर्गयोः ॥ नित्या समासे वा
क्ये तु सा विवक्षामपेक्षते इति ॥ समाद्यर्थनिर्देशस्त्वोपलक्षणं ॥ योगात्स्वर्गो भवतीत्यादावुत्पद्यत इ
त्याद्यर्थाहि ॥ उपसर्गास्त्वर्थविशेषस्य द्योतकाः ॥ प्रभवति १२ ॥ भवति संभवति अनुभवति अभि
भवति उद्भवति परिभवतीत्यादौ विलक्षणार्थावगतेः ॥ तदुक्तं ॥ उपसर्गेण धात्वर्थो बलादन्यः प्र
तीयते ॥ प्रहाराहार संहारविहारपरिहारवत् ॥ इति ॥ ॥ अत सातत्यगमने ॥ ॥ अतति ॥ ॥ अ
त आदेः ॥ ॥ अभ्यासस्यादेरतो दीर्घः स्यात् ॥ आत ॥ आततुः ॥ आतुः ॥ आतिथ ॥ आतथुः ॥ आत ॥
आत ॥ आतिव ॥ आतिम ॥ अतिता ॥ अतिष्यति ॥ अततु ॥ ॥ आडजादीनां ॥ ॥ अजादेरंगस्याट्
लुङ् लङ् लृङ्क्षु ॥ आततु ॥ अततां ॥ अत्यात् ॥ आत्यास्तां ॥ लुङि सिच् इडागमे कृते ॥ ॥ अस्तिसि रामः
चोऽपृक्ते ॥ ॥ विद्यमानात्सिचो वास्तेश्च परस्यापृक्तस्य हल ईडागमः ॥ ॥ इट ईटि ॥ ॥ इटः परस्य ॥५॥
सस्य लोपः स्यादीटि ॥ सिज्लोपएकादेशे सिद्धो वाच्यः ॥ आतीत् ॥ आतिष्टां ॥ ॥ सिजभ्यस्तविदिभ्यश्च ॥ ॥

joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(5A)

सिचोभ्यस्ताद्विदेश्चपरस्य । ङित्संबंधिनो झेर्जुस्स्यात् ॥ आतिष्ठुः । आवीः । आतिष्ठं । आतिष्ठ । आतिष्ठं । आतिष्ठ ॥
आतिष्ठाम । आतिष्ठत ॥ एवं अवरक्षणगतिकांतिप्रीतितृप्त्यवगमप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छादी
प्त्यवाप्त्यालिंगनहिंसादानभागवृद्धिषु ॥ अवती । अवादि ॥ ॥ षिधगत्यां ॥ ॥ पुगंतलघूपधस्य च ॥ ॥ पुगंतस्य
लघूपधस्य चांगस्येकोगुणः [redacted] सार्वधातुकार्धधातुकयोः ॥ ॥ धात्वादेरितिसः । सेधति । असेधत् । सिषेध ।
॥ सेधेः स्तः प्रसः स्तः स्त जस्त स्यान्ये दंत्यात्रांत सादयः एकाचः षोपदेशाः ष्म ष्व त्विर् स्वदं स्वंज स्वपास्मिङः ॥ ॥
दंत्यः केवलदंत्यः ष्वक्कादीनां पृथग्ग्रहणात् ॥ ॥ असंयोगाल्लिट् कित् ॥ ॥ असंयोगात्परोऽपि लिट् कित्
स्यात् । सिषिधतुः । सिषिधुः । सिषेधिथ । सिषिधथुः । सिषिध । सिषेध । सिषिधिव । सिषिधिम । सेधिता ।
सेधिष्यति । सेधतु । असेधत् । सेधेत् । सिध्यात् । असेधीत् । असेधिष्यत् ॥ ॥ सात्पदाद्योः ॥ ॥ सस्य
षो न । इति निषेधे प्राप्ते । ॥ ॥ उपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिच
संजस्वंजां ॥ ॥ उपसर्गस्थान्निमित्तात् परस्य षः ॥ ॥ सदिरप्रतेः ॥ ॥ प्रतिभिन्नादुपसर्गात्सदेरस्य

(6)

म॰ति॰ ॥२३॥

स्तम्भेः। सौत्रस्य सस्य षः। अवाद्वालंबनाविदुर्ययोः। अवात्स्तंभेरेतयोरर्थयोः षः स्यात् ॥१॥
सदेः सस्य षः॥ ॥वेश्च स्वनो भोजने॥ ॥व्यवाभ्यां स्वनतेः सस्य षो भोजने॥ ॥परिनिविभ्यः
सेवसितसयसिवुसहसुट्स्तुस्वंजां॥ ॥परिनिविभ्यः परेषामेषां सस्य षः। निषेधति
॥ ॥प्राक्सितादड्व्यवायेपि॥ ॥सेवसितमयत्र सितशब्दात्प्राग्ये सुनोत्यादयस्तेषाम
ड्व्यवायेपि सस्य षः स्यात्। न्यषेधत्। न्यषेधीत्। न्यषेधिष्यत्॥ ॥स्थादिष्वभ्यासेन
चाभ्यासस्य॥ ॥प्राक्सितात्स्थादिष्वभ्यासेन व्यवायेपि षत्वं स्यात् अभ्यासस्य च॥ नि
षिषेध॥ निषिषिधतुः॥ ॥सेधतेर्गतौ॥ ॥गत्यर्थस्य सेधतेः षो न। गंगां विसेधति॥ ॥
॥ ॥एवं षिती संज्ञाने॥ ॥षुवशोके॥ ॥गदव्यक्तायां वाचि॥ ॥गदति॥ ॥नेर्गदनदपतपदघु
मास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च॥ ॥
उपसर्गस्थान्निमित्तात्परस्य नेर्णः गदादिषु परेषु। प्रणिगदति॥ ॥कुहोश्चुः॥ ॥अभ्यासकवर्ग

राम: ॥६॥

ह[illegible]योश्चवर्गादेशः॥ ॥अत उपधायाः॥ वृद्धिः स्यात् ञिति णिति च प्रत्यये। जगाद। जगदतुः।
जगदुः। जगदिथ। जगदथुः। जगद। ॥णलुत्तमो वा॥ णित्स्यात्। जगाद। जगद। जगदिव। जगदि
म। गदिता। गदिष्यति। गदतु। अगदत्। गदेत्। गद्यात्॥ ॥अतो हलादेर्लघोः॥ हलादेर्लघोर्वृद्धि
र्वा इडादौ सिचि परस्मैपदे। अगादीत्। अगदीत्। अगदिष्यत्॥ ॥णद अव्यक्ते शब्दे॥ ॥णो नः॥ धात्वा
देर्णस्य नः॥ णोपदेशास्त्व[illegible]नर्द्दाटिनाथनाधृनक्कनन्दनतः॥ ॥उपसर्गादसमासेऽपि णोपदेशस्य॥
उपसर्गस्थान्निमित्तात्परस्य णोपदेशस्य धातोर्नस्य णः स्यात्। प्रणदति। प्रणिनदति। नदति। ननाद।
॥अत एकहल्मध्येऽनादेशादेर्लिटि॥ लिण्निमित्तादेशादिकं न भवति यदङ्गं तदवयवस्याऽसंयु
क्तहल्मध्यस्थस्यातस्य एत्वमभ्यासलोपश्च किति लिटि। नेदतुः। नेदुः। आदेशश्चेह वैरूप्यसंपादक
एव गृह्यते। शसिदद्योर्निषेधवचनात् ज्ञापकात्॥ ॥थलि च सेटि॥ इडन्ते थलि च प्रागुक्तं स्याद्॥

(7)

नेदिथ। नेदथुः। नेद। ननाद। ननद। नेदिव। नेदिम। नदिता। नदिष्यति। नदतु। अनदत्। नदेत्। नद्यात्। अ
नादीत्। अनदीत्। अनदिष्यत्॥ ॥श्च्युतिर् क्षरणे॥ ॥इर इत्संज्ञा वा च्या॥ श्च्योतति॥ ॥शर्पूर्वाः खयः॥
यः॥ ॥शिष्यंतेऽभ्यासस्य। हलादिः शेषः। चुश्च्योत॥ ॥इरितो वा॥ ॥इरितो धातोश्च्लेरङ् वा पर
स्मै पदे। अश्च्युतत्। अश्च्योतीत्॥ यकाररहितोऽप्ययं। श्चोतति। चुश्चोत। अश्चुतत्। अश्चोतीत्॥ ॥
॥ ॥श्चुतिर् आसेचने॥ ॥श्च्योतति॥ ॥टुनदि समृद्धौ॥ ॥आदिर्ञिटुडवः॥ ॥उपदेशे धातोराद्या ए
ते इतः स्युः॥ ॥इदितो नुम् धातोः॥ ॥नंदति। ननंद। नंदिता। नंदिष्यति। नंदतु। अनंदत्। नंदेत्। इदि
तो नलोपो न। नंद्यात्। अनंदीत्। अनंदिष्यत्॥ ॥एवं कुथि पुथि लुथि मथि मंथ्या हिंसासंक्लेश
नयोः॥ ॥बिदि अवयवे॥ ॥भिदीति पाठो भ्रमः॥ ॥णडि वदनैकदेशे॥ ॥चदि आह्लादे॥ ॥त्रदि चे
ष्टायां॥ ॥कदि क्रदि क्लदि आह्वाने रोदने च॥ ॥क्लिदि परिदेवने॥ ॥तकि कृच्छ्रजीवने॥ ॥युगि जुगि

रामः
॥७॥

(७५)

वुगिवर्जने॥ ॥मधिमंडने॥ ॥शिघिआघ्राणे॥ ॥मंथविलोडने॥ ॥मंथति।ममंथ।कित्वान्नलो
पः।मथ्यात्॥ ॥अर्चपूजायां॥ ॥अर्चति॥ ॥तस्मान्नुड्‌द्विहलः॥ ॥द्विहलोधातोर्दीर्घीभूताद
तः परस्य नुट्‌स्यात्।आनर्च।आनर्चतुः।अर्चिता।अर्चिष्यति।अर्चतु।आर्चत्।अर्चेत्।अर्च्यात्।आ
र्चीत्।आर्चिष्यत्॥ ॥एवंअर्जगतौ याचने च॥ ॥अर्जति॥ ॥अतिअदिबंधने॥ ॥वनषणसंभक्तौ॥
वनति।ववान॥ ॥नशसददवादिगुणानां॥ ॥शसेर्ददेर्वकारादीनांगुणशब्देनविहितोयोऽत्तस्यएत्व
एत्वाभ्यासलोपौन।ववनतुः।सनति।ससान।सेनतुः॥ ॥येविभाषा॥ ॥जनसनखनामात्स्याद्यादौ
किति।सायात्।सन्यात्॥ ॥वजव्रजगतौ॥ ॥व्रजति।वव्राज।व्रजिता।व्रजिष्यति।व्रजतु।अव्रज
त्।व्रजेत्।व्रज्यात्॥ ॥वदव्रजहलंतस्याचः॥ ॥एषामचोवृद्धिःसिचिपरस्मैपदेषु।अव्राजीत्।
अव्रजिष्यत्॥ ॥कटेवर्षावरणयोः॥ ॥कटति।चकाट।कटिता।कटिष्यति।कटतु।अकटत्।कटे
त्।कट्यात्॥ ॥ह्म्यंतक्षणश्वसजागृणिश्व्येदितां॥ ॥हमयांतस्यक्षणादेर्ण्यंतस्यश्वयतेरे

(8)

म.ति.
॥४३॥

दितश्च वृद्धिर्नैजादौ सिचि । अक्रदीत् । अक्रन्दिष्यत् ॥ ॥ गुपू रक्षणे ॥ ॥ ॥ गुपूधूपविच्छिपणिपनिभ्य आयः ॥ ॥ स्वा
र्थे ॥ ॥ सनाद्यन्ता धातवः ॥ ॥ सनादयः क्रमेलिङन्ताः प्रत्यया अन्ते येषां ते धातुसंज्ञाः स्युः ॥ सन्क्यच्काम्यच्क्य
ङ् क्यषोथाचारक्विब्णिज्यङौ तथा ॥ यगाय ईयङ्णिङ् चेति द्वादशामी सनादयः ॥ १ ॥ सनाद्यन्ताधातव इत्य
स्यानन्तरं भूवादयइत्येव सूत्रयितुमुक्तं । धातुत्वाल्लुडादयः । गोपायति ॥ ॥ ॥ आयादयआर्द्धधातुके वा ॥ ॥ ॥ आर्द्ध
धातुकविवक्षायामायादयो वा स्युः ॥ कास्यनेकाच आम्वक्तव्यो लिटि ॥ कासः प्रत्ययांतस्य च आम्विधानान्मस्य
नेत्वं ॥ ॥ ॥ अतो लोपः ॥ ॥ ॥ ओर्द्धधातुकोपदेशे यददन्तं तस्यातो लोप आर्द्धधातुके ॥ ॥ ॥ आमः ॥ ॥ ॥ आमः परस्य लु
क् ॥ ॥ ॥ कृञ्चानुप्रयुज्यते लिटि ॥ ॥ ॥ आमन्ताल्लिट्परान् कृभ्वस्तयोनुप्रयुज्यन्ते तेषां द्वित्वादि ॥ ॥ ॥ उरत् ॥ ॥ ॥ अ
भ्यासऋवर्णस्यात्प्रत्यये । रपरः । गोपायांचकार । द्वित्वात्परत्वाद्यणि प्राप्ते ॥ ॥ ॥ द्विर्वचनेचि ॥ ॥ ॥ द्वित्वनिमित्ते
अचि अच आदेशो न द्वित्वे कर्तव्ये । गोपायांचक्रतुः । गोपायांचक्रुः ॥ ॥ ॥ एकाच उपदेशेनुदात्तात् ॥ ॥ ॥ उपदे
शे यो धातुरेकाजनुदात्तश्च ततः परस्यार्द्धधातुकस्येण्न ॥ ॥ ऊदृदन्तैर्यौतिरुक्ष्णुशीस्नुनुक्षुश्विडीङ्श्रिभिः ॥ वृङ्

रामः
॥५॥

(8A)

दृन्भ्दृभ्यां वधिनेका वोजं त्तेषुनिहताः स्मृताः ॥१॥ कां तेषु राकॄ कः। वां तेषु पश्मुश्शिवृ वश्चृषिश्रृसिवः षट् ॥ छां
त्तेषु प्रछे कः ॥ जां त्तेषु त्यज्ञ निजिर् भज्ज भंज भुज भ्रस्ज मस्ज् यज् युज् रुज् रंज् विजिर् स्वंज् सञ्ज् सृज्
जः पंचदश ॥ दांत्तेषु अद् क्षुद् खिद् छिद् तुद् नुद् पद्य भिद् विद्य विनद् विंद शद् सद् स्विद्य स्कंद हदः
षोडश ॥ धांतेषु क्रुध क्षुध बुध्य बंध युध रुध राध व्यध शुध साध्य सिध्या एकादश ॥ नांत्तेषु मन्य ह
घुष नौ द्वौ ॥ पांत्तेषु आप् क्षिप् क्षुप तप् तृप् तिपृ दृप् लिप् लुप् वप् शप् स्वप् सृप् त्रयोदश ॥ भांत्तेषु यभ् र
भ् लभ् त्रयः ॥ मांत्तेषु गम्ल नम् यम् रम् चत्वारः ॥ शांत्तेषु क्रुश दंश दिश् दृश् मृश् रिश् रुश् लिश्
विश् स्पृश शोडश ॥ षांत्तेषु कृष त्विष तुष द्विष दुष पुष्य पिष् विष् शिष् शुष् श्लिष्या एकाद
श ॥ सांतेषु घस्ल वसती द्वौ ॥ हांत्तेषु दह दिह दुह नह मिह रुह लिह वहो ऽष्टौ ॥ अनुदात्ता हलंत्तेषु
धातवस्त्र्यधिकं शतं ॥ ॥ गोपायां वकेऽर्थ । गो पायां वीकस्थेः । गोपायां वक्र । गोपायां वकार । गो

(९)

x वदव्रजहलंतस्याचः। एवाम्न्चोदृद्धिः सिचिपरस्मैपदेषु। इति प्राप्ते। ।४

पायो चकर। गोपायां चकृव। गोपायां चकृम। गोपायांबभूव। गोपायामास। जुगोप। जुगुपतुः। जुगुपुः॥ ॥स्वर
तिसूतिसूयतिधूञूदितो वा॥ ॥स्वरत्यादेरूदितश्च परस्य वलादेरार्द्धधातुकस्येड्वा। जुगोपिथ। जुगोप्थ।
गोपायिता। गोपिता। गोप्ता। गोपायिष्यति। गोपिष्यति। गोप्स्यति। गोपायतु। अगोपायत्। गोपायेत्। गोपाय्या
त्। गुप्यात्। अगोपायीत्॥ ॥नेटि॥ ॥इडादौ सिचि हलन्तलक्षणा वृद्धिर्न। अगोपीत्। अगोप्सीत्॥ ॥झ
लो झलि॥ ॥झलः परस्य सस्य लोपः स्याज्झलि। अगौप्ताम्। अगौप्सुः। अगौप्सीः। अगौप्तं। अगौप्त। अगौ
प्सं। अगौप्स्व। अगौप्स्म॥ अगोपायिष्यत्। अगोपिष्यत्। अगोप्स्यत्॥ ॥क्षि क्षये॥ ॥क्षयति। चिक्षाय।
चिक्षियतुः। चिक्षियुः। एकाच इति निषेधे प्राप्ते॥ ॥कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि॥ ॥क्रादिभ्य एव लिट इड्
न स्यादन्यस्माद निटोपि स्यात्॥ ॥अचस्तास्वत्थल्यनिटो नित्यं॥ ॥उपदेशेऽजन्तो यो धातुस्तासौ
नित्यानिट् ततः परस्य थल इड् न॥ ॥उपदेशेऽत्वतः॥ ॥उपदेशेऽकारवतस्तासौ नित्यानिटः परस्य थल
इड् न॥ ॥ऋतो भारद्वाजस्य॥ ॥तासौ नित्यानिट ऋदन्तादेव थलो नेड् भारद्वाजस्य मतेन। तेनान्यस्य रामः ॥६॥

(9A.)

स्यादेव ॥ अयमत्र संग्रहः ॥ अजंतो ऽकारवान्वा यस्तास्यनिट् थलि वेड्ययं । अदृतः ईदृङ्क्रि सानिटू वृञ् क्रा
द्यन्यो लिटि सेड् भवेत् ॥ १ ॥ चिक्षेपिथ । चिक्षेप्थ । चिक्षिपथुः । चिक्षिप । चिक्षाय । चिक्षेप । चिक्षिपि
व । चिक्षिपिम ॥ क्षेप्ता । क्षेप्स्यति । क्षिपतु । अक्षिपत् । क्षिपेत् ॥ ॥ अकृत्सार्वधातुकयोर्दीर्घः ॥ ॥ अजंतांग
स्य दीर्घः स्याद्यादौ प्रत्यये परे न तु कृत्सार्वधातुकयोः । क्षीयात् ॥ ॥ सिचि वृद्धिः परस्मैपदेषु ॥ ॥ इगंतां
गस्य वृद्धिः परस्मैपदे सिचि । अक्षैप्सीत् । अक्षेप्स्यत् ॥ ॥ तप संतापे ॥ ॥ तपति । तताप । तेपिथ । ततप्थ ।
तप्ता । तप्स्यति । तपतु । अतपत् । तपेत् । तप्यात् । अताप्सीत् । अतप्स्यत् ॥ ॥ निसस्तपता
वनासेवने ॥ ॥ षः स्यात् आसेवनं पौनःपुन्यं ततो ऽन्यस्मिन्विषये । निस्तपति ॥ ॥ क्रमु पादविक्षेपे ॥ ॥ ॥
॥ ॥ वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः ॥ ॥ एभ्यः श्यन्वा कर्तरि सार्वधातुके । पक्षे शप् ॥
॥ ॥ क्रमः परस्मैपदेषु ॥ ॥ क्रमेर्दीर्घः परस्मैपदे शिति । क्राम्यति । क्रामति । चक्राम । ॥ ॥ क्लमु

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(10)

म॰ति॰ ॥४३॥

क्रमो रनात्मनेपदनिमित्ते॥ ॥ अत्रैव द्। चक्रमिथ। क्रमिता। क्रमिष्यति। क्राम्यतु। क्रामतु। अक्रा
म्यत्। अक्रामत्। क्राम्येत्। क्रामेत्। क्रम्यात्। अक्रमीत्। अक्रमिष्यत्॥ ॥यमु छमु जमु झमु अद
ने॥ ॥॥ ॥ष्ठिवुक्लमुचमां शिति॥ ॥अचो दीर्घः॥ आङि चम इति वक्तव्यं॥ आचामति। आङि किं। च
मति। विचमति॥ ॥स्खल संचलने॥ ॥स्खलति। चस्खाल॥ ॥ ॥अतो ल्रांतस्य॥ ॥ अतः समीपौ
यौ ल्रौ तदंतस्यांगस्यातो वृद्धिः परस्मैपदे सिचि॥ अस्खालीत्॥ ॥त्सर छद्मगतौ॥ ॥अत्सारी
त्॥ ॥पा पाने॥ ॥॥ ॥पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनय
च्छपश्यर्च्छधौशीयसीदाः॥ ॥ पादीनां पिबादयः स्युरित्संज्ञकशादौ प्रत्यये। पिबादेशोऽदन्तस्ते
न न गुणः। पिबति॥ ॥आत औ णलः॥ ॥पपौ॥ ॥ ॥आतो लोप इटि च॥ ॥अजाद्योरार्द्धधातुक
योः क्ङिदिटोः परयोरातो लोपः। पपतुः। पपुः। पपिथ। पपाथ। पपथुः। पप। पपौ। पपिव। पपिम। पा

राम॰ ॥१०॥

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com